पञ्चमः पाठः

# संस्कृतस्य महिमा

[गुरुशिष्यमध्ये संस्कृतकक्षायां संस्कृतभाषायाः महत्त्वविषये रोचकः संवादः पाठेऽस्मिन् वर्तते। अनेन संवादेन छात्राणां ज्ञानवृद्धिः जिज्ञासा च प्रवर्तेते। संस्कृतस्य व्यापकत्वं शब्दरचनाशक्तिम् अन्यमुपयोगं च दर्शयति पाठोऽयम् ।]

(संस्कृतशिक्षकः कक्षां प्रविशति। छात्राः स्वस्थानादुत्थाय अभिवादनं कुर्वन्ति।)

**शिक्षकः** – उपविशन्तु सर्वे। अद्य संस्कृतस्य महत्त्वं कथयामि।

**रमेशः** – गुरुदेव! अपि संस्कृतस्य अध्ययनं लाभकरम्?

**शिक्षकः** – न जानासि वत्स?संस्कृतं विना न संस्कृतिः।

**राजीवः** – का नाम संस्कृतिः?

**शिक्षकः** – संस्कृते एव आचाराः विचाराः भावनाश्च सन्ति। यत्रेमे भवन्ति, तत्रैव संस्कृतिः।

**पुष्करः** – कथयन्ति जनाःयत् इयं मृता भाषा।

**शिक्षकः** – वत्स! ज्ञानहीनास्ते। अस्यामेव भारतीयभाषाणां जीवनम्। अस्या एव भारतीयाः भाषाः निर्गताः। एतदर्थं सा भाषाणां जननी कथ्यते। नेयं मृता भाषा, अपितु अजरा अमरा चेति। अद्यापि सा जीवति।

**रमेशः** – अस्यामेव भारतीयभाषाणां जीवनम्?

**शिक्षकः** – अथ किम्? सर्वाः भारतीयभाषाःसंस्कृतभाषायाः ऋणं धारयन्ति। अत्रैव प्राचीनं वेदादिशास्त्रं रचितम्।

कमालः – शब्दज्ञानाय संस्कृतकोशोऽपि वर्तते किम् ?

**शिक्षकः** – आम् आम्। प्राचीनाः नवीनाश्च अनेके संस्कृतकोशाः सन्ति। शब्दरचनाविधिरपि व्याकरणे वर्तते। तेन लक्षशः शब्दाः निर्मीयन्ते, अन्यासु भाषासु प्रदीयन्ते।

**पुष्करः** – अस्याः व्याकरणम् अपूर्वं तर्हि।

**शिक्षकः** – अत्र पाणिनिः श्रेष्ठः वैयाकरणः आसीत्। तत्सदृशः न कुत्रापि वैयाकरणो जातः।

**लतिका** – किं पाणिनिसमानः कुत्रापि वैयाकरणो नास्ति?

**शिक्षकः** – आम्, अस्योत्तरं सर्वत्र मौनमस्ति।

**रमा** – गुरुदेव! मम पिता कथयति यत् संगणके (कंप्यूटरयन्त्रे) अपि संस्कृतं सहायकं भवति।

**शिकक्षः** – सत्यं वदति ते पिता। अपि च– योगशास्त्रे पतञ्जलिकृतं योगदर्शनमपि अपूर्वम्।

**कमालः** – पूज्यवर। श्रूयते यत् संस्कृते क्रियारूपाणि असंख्यानि सन्ति।

**शिक्षकः** – सत्यमेतत्। धातवः एव द्विसहस्राधिकाः। तेषां दशलकारेषु नाना रूपाणि भवन्ति। सर्वेषु लकारेषु नव-नव रूपाणि सन्ति।

**पुष्करः** – धातवोऽपि त्रिधा भवन्ति इति भवान् उक्तवान्।

**शिक्षकः** – आम्। केचिद् आत्मनेपदिनः, केचित् परस्मैपदिनः, केचिद् उभयपदिनः। एवं त्रिधा ते भवन्ति।

**रहीमः** – तदा तु भाषेयम् अतीव जटिला।

**शिक्षकः** – न न। सरलापि सा, कठिनापि सा। सामान्यप्रयोगे सरला, गूढविषयनिरूपणे जटिला। यथेच्छं प्रयोगः क्रियते।

**रमा** – गुरुदेव! किं विज्ञानानि अपि संस्कृते सन्ति?

**शिक्षकः** – किं कथयसि?भूगोल-खगोलविषये आर्यभटीयम्, बृहत्संहिता इत्यादयः ग्रन्थाः प्रसिद्धाः।

**राजीवः** – अतः परं नास्ति किमपि?

**शिक्षकः** – कथं नास्ति?बीजगणितं चिकित्साशास्त्रं भौतिकविज्ञानं रसायनशास्त्रं वनस्पतिविज्ञानं वास्तुविज्ञानं विधिशास्त्रं संगीतशास्त्रम् इत्यादीनि नानाग्रन्थेषु प्रकाशितानि सन्ति। प्राचीनं भारतीयं विज्ञानं पठितव्यम्।

**रमाः** – किं प्रतियोगिपरीक्षासु संस्कृतम् उपयोगि वर्तते?

**शिक्षकः** – प्रायः सर्वत्र प्रशासनिकपरीक्षासु संस्कृतमपि ऐच्छिको विषयः।

**रहीमः** – तदा तु इयमतीव उपयोगिनी भाषा।

**शिक्षकः** – अथ किम्।

**पुष्करः** – तर्हि नूनमेव सर्वैरस्माभिः मनोयोगेन संस्कृतं पठनीयम्। धन्येयं भाषा।

## शब्दार्थाः

| | | |
|---|---|---|
| **अथ किम्** | आम्, निर्विवादम् | हाँ, अवश्य |
| **अजरा** | अनश्वरा, न भवति जीर्णा | क्षीण न होने वाली |
| **लक्षशः ( लक्ष + शस् )** | अनेक-लक्षसंख्यायाम् | लाखों की संख्या में |
| **निर्मीयन्ते** | रच्यन्ते | रचे जाते हैं, बनते हैं |
| **त्रिधा ( त्रि + धा )** | त्रिविधाः | तीन प्रकार के |
| **जटिला ( जटा + इलच् )** | कठिना | उलझी हुई, कठिन |
| **गूढः ( Öगुह + क्त )** | कठिनः, गहनः | कठिन, भारी |
| **यथेच्छम्** | इच्छानुसारेण | इच्छा के अनुसार |
| **मनोयोगेन** | ध्यानसहितम् | मन लगाकर |
| **निर्गताः** | उत्पन्नाः | निकली हैं |

## व्याकरणम्

**( क ) व्युत्पत्ति :**

**संस्कृतिः** – सम् + Öकृ + क्तिन्

**संस्कृतम्** – सम् + Öकृ+ क्त

**उत्थाय** – उद् + Öस्था + ल्यप्

**मृता** – Öमृञ् + क्त + टाप्

**त्रिधा** – त्रि + धा (तद्धित प्रत्यय)

**आर्यभटीयम्** - आर्यभट + छ

**तर्हि** - तद् + र्हिल्

**जीवनम्** - ⊠जीव् + ल्युट्

**जटिला** - जटा + इलच् + टाप्

## (ख) सन्धि-विच्छेद :

**ज्ञानहीनास्ते** - ज्ञानहीना: + ते

**नेयम्** - न + इयम्

**विधिरपि** - विधि: + अपि

**कोशोऽपि** - कोश: + अपि

**नास्ति** - न + अस्ति

**सर्वैरस्माभि:** - सर्वै: + अस्माभि:

## अभ्यास: (मौखिक:)

### 1. एकपदेन उत्तरं वदत

उदाहरणम्– **रामं विना का नास्ति - अयोध्या**

(क) संस्कृतं विना का नास्ति?

(ख) कस्य अध्ययनम् आवश्यकम्?

(ग) संस्कृते के सन्ति?

(घ) संस्कृतं प्रति जना: किं कथयन्ति?

(ङ) कस्यां भाषायां वेदा: उपलभ्यन्ते?

(च) पाणिनि: कस्मिन् शास्त्रे निपुण:?

### 2. एकवाक्येन उत्तरं दत्त

उदाहरणम्– **किम् अध्ययनं आवश्यकम्? संस्कृताध्ययनम् आवश्यकम्।**

(क) कस्यां भाषायां शब्द निर्माण-पद्धतिरस्ति?

(ख) कस्या: भाषाया: व्याकरणम् अपूर्वम्?

(ग) संगीतरत्नाकरः कस्मिन् शास्त्रे ग्रन्थः?

(घ) धातवः कतिधा सन्ति?

(ङ) आर्यभटः कस्य शास्त्रस्य ग्रन्थकारः?

## अभ्यासः (लिखितः)

### 1. सन्धिविच्छेदं कुरुत–

वार्तालापः, नेयम्, एतदर्थम्, अत्रैव, विषयेऽस्मिन्

### 2. अधोलिखितवाक्येषु रेखाङ्कितपदानि आधृत्य प्रश्नान् रचयत–

(क) <u>संस्कृतं</u> विना न संस्कृतिः।

(ख) <u>संस्कृते</u> एव आचारादयः।

(ग) भारतीयाः भाषा अस्याः <u>ऋणं</u> धारयन्ति।

(घ) <u>दश</u> उपनिषदः सन्ति।

(ङ) पाणिनिः <u>वैयाकरणः</u> अस्ति।

### 3. अधोलिखितवाक्येषु कोष्ठकात् समुचितं पदमादाय रिक्तस्थानानि पूरयत–

(क) संस्कृतं विना न ......................। (**ज्ञानम्, संस्कृतिः, संरक्षणम्**)

(ख) भाषाणां जननी ......................। (**संस्कृतम्, हिन्दी, अंग्रेजी**)

(ग) इयं भाषा ...................... अस्ति। (**अजरा-अमरा, मृता**)

(घ) क्रियार्थं ...................... लकाराः सन्ति। (**पञ्च, दश, अष्टौ**)

(ङ) व्याकरणशास्त्रस्य लेखकः ......................। (**यास्कः, पाणिनिः**)

### 4. संस्कृतभाषायामनुवादं कुरुत–

विनय के बिना विद्या व्यर्थ है। ज्ञान के विना सुख नहीं। राम के विना अयोध्या नहीं। वेद चार हैं। पुराण अठारह हैं। स्मृतियाँ 108 हैं।

## योग्यता-विस्तारः

(क) अस्मिन् पाठे संस्कृतस्य वैशिष्ट्यं वर्णितमस्ति। संस्कृते एव संस्काराः संस्कृतयश्च वर्तन्ते। अष्टादश पुराणानि चत्वारो वेदाः उपनिषदोऽपि अत्रैव। सर्वाणि शास्त्राणि संस्कृतभाषायां सन्ति। सङ्गणकेऽपि अस्याः योगदानमपूर्वम्।

(ख) **'अपि'** शब्दस्य प्रयोगः वाक्यस्य आदौ यदि भवेत् तदा स प्रश्नवाचकः। यथा–

अपि त्वं गच्छसि?

अपि भवान् पठति?

अपि अहं गच्छामि?

(ग) पृथग्विनानानाभिस्तृतीयान्यतरस्याम् एभिर्योगे द्वितीया स्यात् पञ्चमी, तृतीया च। यथा–

रामं/ रामेण/ रामात् पृथक् न वसामि

संस्कृतं/ संस्कृतेन/ संस्कृतात् विना न संस्कृतिः

(घ)

| | | |
|---|---|---|
| रेखागणितस्य ज्ञाता | - | बौधायनः |
| बीजगणितस्य | - | आर्यभटः |
| शल्यचिकित्सायाः | - | सुश्रुतः |
| पशुचिकित्सायाः | - | शालिहोत्रः |
| भौतिकविज्ञानस्य | - | कणादः |
| रसायनविज्ञानस्य | - | पतञ्जलिः |
| भाषाविज्ञानस्य | - | यास्क, पाणिनिः, पतञ्जलिः |
| विधिशास्त्रस्य | - | मनुः |
| विधिविज्ञानस्य | - | याज्ञवल्क्यः नारदः |
| कामशास्त्रस्य | - | वात्स्यायनः |

(ङ) (i) दश लकाराः भवन्ति – लट्, लिट्, लुट्, लृट्, लेट्, लोट्, लङ्, लिङ्, लुङ्, लृङ्।

(ii) धातुः त्रिधा– आत्मनेपदी परस्मैपदी उभयपदी च।

आत्मनेपदी यथा – लभते लभेते लभन्ते।

परस्मैयदी यथा – पठति पठतः पठन्ति।

उभयपदी यथा – कुरुते कुर्वाते कुर्वते (आ०)

करोति कुरुतः कुर्वन्ति (प०)